# ॥ लिङ्गोद्भव स्तोत्रम् ॥

लिङ्गमूर्तिं शिवं स्तुत्वा गायत्र्या योगमाप्तवान् ।
निर्वाणं परमं ब्रह्म वसिष्ठोन्यश्च शङ्करात् ॥

वसिष्ठ उवाच
नमः कनकलिङ्गाय वेदलिङ्गाय वै नमः ।
नमः परमलिङ्गाय व्योमलिङ्गाय वै नमः ॥
नमः सहस्रलिङ्गाय वह्निलिङ्गाय वै नमः ।
नमः पुराणलिङ्गाय श्रुतिलिङ्गाय वै नमः ॥
नमः पाताळलिङ्गाय ब्रह्मलिङ्गाय वै नमः ।
नमो रहस्यलिङ्गाय सप्तद्वीपोर्ध्वलिङ्गिने ॥
नमः सर्वात्मलिङ्गाय सर्वलोकाङ्गलिङ्गिने ।
नमस्त्वव्यक्तलिङ्गाय बुद्धिलिङ्गाय वै नमः ॥
नमोऽहङ्कारलिङ्गाय भूतलिङ्गाय वै नमः ।
नम इन्द्रियलिङ्गाय नमस्तन्मात्रलिङ्गिने ॥
नमः पुरुषलिङ्गाय भावलिङ्गाय वै नमः ।
नमो रजोऽर्धलिङ्गाय सत्त्वलिङ्गाय वै नमः ॥
नमस्ते भवलिङ्गाय नमस्त्रैगुण्यलिङ्गिने ।
नमो नागतलिङ्गाय तेजोलिङ्गाय वै नमः ॥

नमो वायूर्ध्वलिङ्गाय मायालिङ्गाय वै नमः ।

नमस्ते धर्मलिङ्गाय सामलिङ्गाय वै नमः ॥

नमो यज्ञाङ्गलिङ्गाय यज्ञलिङ्गाय वै नमः ।

नमस्ते तत्त्वलिङ्गाय देवानुगतलिङ्गिने ॥

दिश नः परमं योगमपत्यं मत्समं तथा ।

ब्रह्म चैवाक्षयं देव शमं चैवं परं विभो ।

अक्षयत्वं च वंशस्य धर्मे च मतिमक्षयाम् ॥

अग्निरुवाच

वसिष्ठेन स्तुतः शम्भुः तुष्टः श्रीपार्वतीपतिः ।

वसिष्ठाय वरं दत्वा तत्रैवान्तरधीयत ॥

॥ वन्दे गुरुं शङ्करम् ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]